# ज्ञानकल्पवृक्षाः।

**अवबोधनम्।**

अ. **एकवाक्येन उत्तरं लिखत।**

*१. **कः** साक्षरोऽपि निरक्षरः आधुनिककाले?

उत्तरः **यःसङ्गणकविषये अन्तर्जालविषये च अनभिज्ञः सः** साक्षरोऽपि निरक्षरः आधुनिककाले।

*२. मानवस्य **कः**श्रेष्ठाविष्कारः?

उत्तरः **अन्तर्जालम् इति** मानवस्य श्रेष्ठाविष्कारः।

*३. **किं** नाम सङ्गणकजालान्तरिक्षम्?

उत्तरः **सङ्गणकानां लघुगुरुजालकानां मिथः सम्बन्धेन विश्वव्यापि यज्जालं भवति, तदेव** सङ्गणकजालान्तरिक्षम्।

*४. **किं** नाम अन्तर्जालम्?

उत्तरः **विश्वव्यापिजालं (WWW) संज्ञापनतन्त्रज्ञानस्य महाजालं वा** नाम अन्तर्जालम्)।

५. विद्यालयेषु अन्तर्जालं **किमर्थं** प्रयुज्यते?

उत्तरः विद्यालयेषु अन्तर्जालं **अध्ययनाध्यापनार्थम्** प्रयुज्यते।

६. 'मोडेम्' **कैः** सङ्गणकं संयोज्य अन्तर्जालस्य संरचना भवति?

उत्तरः 'मोडेम्' **दूरसञ्चारतन्तुभिः** सङ्गणकं संयोज्य अन्तर्जालस्य संरचना भवति ।

७. ज्ञानप्राप्तेः अतिद्रुतगतिमार्गः **कः?**

उत्तरः ज्ञानप्राप्तेः अतिद्रुतगतिमार्गः **अन्तर्जालम्**।

**ब. योग्यं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

१. ________ संसारे किं किं न परिवर्तते।

(परिवर्तिनी / परिवर्तीनी / परिवर्तिनि)

उत्तरः **परिवर्तिनी** संसारे किं किं न परिवर्तते।

२. यः सङ्गणकविषये चानभिज्ञः सः साक्षरोऽपि ________ एव मन्यते। (निरक्षराः / निरक्षरः / निरक्षरे)

उत्तरः यः सङ्गणकविषये चानभिज्ञः सः साक्षरोऽपि **निरक्षरः** एव मन्यते।

३. विद्यालयेषु अपि सङ्गणकः प्रयुज्यते ________।

(अस्माभिः/ वयम् / अस्माकम्)

उत्तरः विद्यालयेषु अपि सङ्गणकः प्रयुज्यते **अस्माभिः।**

४. अद्ययावत् ________ एषा।

(महाक्रान्तिम् / महाक्रान्तीः / महाक्रान्तिः)

उत्तरः अद्ययावत् **महाक्रान्तिः** एषा।

५. जनहितार्थं जनैर्निर्मितम् ________ गणतन्त्रमेव।

( इदं / अयं / इयं )

उत्तरः जनहितार्थं जनैर्निर्मितम् **इदं** गणतन्त्रमेव।.

**क. सत्यं वा असत्यं तद् लिखत।**

१. परिवर्तिनि संसारे किमपि न परिवर्तते।

उत्तर: **असत्यम्।**

२. य: अन्तर्जालविषये अनभिज्ञ: स: निरक्षर एव।

उत्तर: **सत्यम्।**

३. अन्तर्जालं गृहे गृहे विद्यते।

उत्तर: **सत्यम्।**

४. अपरिमितज्ञानार्जनस्य कृते धनम् अपेक्षते।

उत्तर: **असत्यम्।**

**ड. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. अधुना साक्षरताया: व्याख्या परिवर्तिता। यत: _______
(जगति सर्वे साक्षरा: जाता:। / संसार: परिवर्तनशील:।)

उत्तर: अधुना साक्षरताया: व्याख्या परिवर्तिता। यत: **संसार: परिवर्तनशील:।**

२. अन्तर्जालमिती ज्ञानप्राप्ते: अतिद्रुतगतिमार्ग:। यत: _______
(एतत् संज्ञापनतन्त्रज्ञानस्य महाजालम् अस्ति। /
एतेन मार्गेण अतीव वेगेन गन्तुं शक्यते)

उत्तर: अन्तर्जालमिती ज्ञानप्राप्ते: अतिद्रुतगतिमार्ग:। यत: **एतत् संज्ञापनतन्त्रज्ञानस्य महाजालम् अस्ति।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'यः अन्तर्जालविषये अनभिज्ञः सः साक्षरोऽपि निरक्षरः एव' एतस्य विषये माध्यमभाषया स्वमतं प्रकटयत।

**उत्तर:** 'ज्ञानकल्पवृक्षः' या पाठांत संगणक व इंटरनेटप्रणालीची माहिती व त्याचे उपयोग वर्णन केले आहेत. हा माहितीपूर्ण पाठ 'मोडेम्' संगणकजालान्तरिक्ष (Cyberspace) आणि विश्वव्यापी जाळे (W.W.W) याबद्दल माहिती देते. इंटरनेट आपल्याला क्षणार्धात, काहीही शुल्क न घेता जगातील जवळजवळ प्रत्येक गोष्टीची माहिती देते.


मानवाने आजतागायत लावलेल्या सर्व शोधांमध्ये 'इंटरनेट' हा सर्वश्रेष्ठ शोध समजला जातो. त्यामुळे माहिती तंत्रज्ञानामध्ये क्रांतिकारी बदल झाला आहे. उद्योगजगतातील बहुतांशी कार्य इंटरनेटद्वारे होते. माहिती-तंत्रज्ञानक्षेत्र किंवा अन्य कोणत्याही व्यवसायक्षेत्रात नोकरी मिळविण्यासाठी मनुष्यास संगणक व इंटरनेट याविषयीचे मूलभूत ज्ञान असणे अनिवार्य आहे. बॅकांनीही आता संगणकीय वाणिज्यासाठी इंटरनेटचा वापर सुरू केला आहे. या सुविधेमुळे अनेक आर्थिक व्यवहार उदा. देयके इ. भरणा तसेच, इतर शुल्कांचे भरणे अधिक सुलभ आणि

गतिमान झाले आहेत. हल्ली इंटरनेट विविध सद्यस्क-परीक्षांच्या उद्देशांसाठीही वापरले जाते. यामुळे संगणक हाताळण्याचे ज्ञान प्राप्त न करता केवळ परीक्षेसाठी केलेला आशयाचा अभ्यास येथे निरुपयोगी ठरतो. म्हणून परीक्षार्थीने इंटरनेटचा वापर शिकून घेतलाच पाहिजे.

अशा प्रकारे इंटरनेमुळे जगात क्रांतिकारी बदल घडला आहे हे लक्षात येते. बहुतांशी सर्वच गोष्टी यामार्फतच कार्य करतात. म्हणून इंटरनेटच्या ज्ञानाशिवाय मनुष्याला या विकसनशील जगाशी जुळवून घेणे अवघड झाले आहे. जरी त्याच्याकडे शैक्षणिक पदव्या असल्या तरीही त्याची कोणत्याही संस्थेत नियुक्ती होऊ शकणार नाही, तो सद्यस्क-परीक्षा देऊ शकणार नाही की वेगवान आर्थिक व्यवहार करू शकणार नाही. त्यामुळेच 'इंटरनेटबाबत जो अज्ञानी आहे तो साक्षर असूनही निरक्षरच होय' असे म्हटले आहे.

## पृथक्करणम्।

गद्यांशे आगतम्, अन्तर्जालस्य वर्णनं पठित्वा रेखाजालचित्रं पूरयत।




**उत्तरः १. सर्वश्रेष्ठाविष्कारः। २. महाक्रान्तिः।**
**३. अतिद्रुतगतिमार्गः। ४. महाजालम्।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| १. | जगत् ,भवः, विश्वम्, जीवलोक; लोकः | = | **संसारः।** |
| २. | अज्ञः, अबोधः, अज्ञानः, मूढः, अविज्ञः | = | **अनभिज्ञः।** |
| ३. | गेहम्, सदनम्, निकेतनम्, सद्म, भवनम्, वेश्म | = | **गृहम्।** |
| ४. | शाला, पाठशाला | = | **विद्यालयः।** |
| ५. | अल्पम्, ह्रस्वम्, स्वल्पम्, प्रतनु | = | **लघु।** |
| ६. | बृहत्, महत् | = | **गुरु।** |
| ७. | तान्तवम्, कुलायम्, वयः (जाळे) | = | **जालम्, जालकम्।** |
| ८. | अन्तरालम्, व्योम, आकाशम्, अवकाशः | = | **अन्तरिक्षम्।** |
| ९. | प्रजाः, जनताः | = | **जनाः।** |
| १०. | अप्रमितम्, अमितम्, अविमितम् (अगणित) | = | **अपरिमितम्।** |
| ११. | मुद्रा, काकणिः (नाणे) | = | **नाणकम्।** |
| १२. | मनुष्यः, नरः, मनुजः, मर्त्यः | = | **मानवः।** |

**ब. गद्यांशे विलोमशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| १. | अभिज्ञः | × | **अनभिज्ञः।** |
| २. | साक्षरः | × | **निरक्षरः।** |
| ३. | लघु | × | **गुरु।** |
| ४. | परिमितम् | × | **अपरिमितम्।** |

**क. समूहेतरं पदं चिनुत।**

१. संसारः, विश्वम, अखिलम्, जगत्

**उत्तरः अखिलम्।**

२. अज्ञः, अनभिज्ञः, अबोधः, तज्ञः

**उत्तरः तज्ञः।**

३. छद्म, निकेतनम्, गृहम, सद्म

**उत्तरः छद्म।**

४. अपेक्षते, भवति, विद्यते, मन्यते

**उत्तरः भवति।**

५. इदम्, बत, मिथः, कृते

**उत्तरः इदम्।**

**ड. चतुर्थपदं लिखत।**

१. परिवर्तिन् : परिवर्तिनि :: संसार : ______

**उत्तर:** परिवर्तिन् : परिवर्तिनि :: संसार : **संसारे**

२. परि + वृत् : परिवर्तते :: अप + ईक्ष् : ______

**उत्तर:** परि + वृत् : परिवर्तते :: अप + ईक्ष् : **अपेक्षते**

३. साक्षरोऽपि : साक्षर: + अपि :: सङ्गणकोऽन्तर्जालम् : ______

**उत्तर:** साक्षरोऽपि : साक्षर: + अपि :: सङ्गणकोऽन्तर्जालम् : **सङ्गणक: + अन्तर्जालम्**

४. विद्यतेऽस्माकम् : विद्यते +अस्माकम् :: प्रयुज्यतेऽस्माभि: : ______

**उत्तर:** विद्यतेऽस्माकम् : विद्यते +अस्माकम् :: प्रयुज्यतेऽस्माभि: : **प्रयुज्यते + अस्माभि:**

५. संशोधन : संशोधनेषु :: विद्यालय : ______

**उत्तर:** संशोधन : संशोधनेषु :: विद्यालय : **विद्यालयेषु**

**इ. धातुसाधित-अव्ययानां चयनम्।**

**१. गद्यांशे आगतं पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययं चित्वा लिखत।**

**उत्तर:** संयोज्य।

**फ. सन्धिविग्रहं कुरुत।**

*१. निरक्षर एव = **निरक्षर: + एव।**

*२. विद्यतेऽस्माकम् = **विद्यते + अस्माकम्।**

*३. विद्यालयेष्वपि = **विद्यालयेषु + अपि।**

*४. यज्जालम् = **यत् + जालम्।**

| | | | |
|---|---|---|---|
| ५. | अद्ययावन्महाक्रान्तिरेषा | = | **अद्ययावत् + महाक्रान्तिः + एषा।** |
| ६. | लघूपकरणमस्ति | = | **लघु + उपकरणम् + अस्ति।** |
| ७. | अन्तर्जालमिति | = | **अन्तर्जालम् + इति।** |
| ८. | नाणकमेकमपि | = | **नाणकम् + एकम् + अपि।** |

**ग. सन्धिं कुरुत।**

| | | | |
|---|---|---|---|
| *१. | जनैः + निर्मितम् +इदम् | = | **जनैर्निमितमिदम्।** |
| *२. | साक्षरः + अपि | = | **साक्षरोऽपि।** |
| ३. | प्रयुज्यते + अस्माभिः | = | **प्रयुज्यतेऽस्माभिः।** |
| ४. | गणतन्त्रम् + एव | = | **गणतन्त्रमेव।** |
| ५. | च + अनभिज्ञः | = | **चानभिज्ञः।** |
| ६. | न + अपेक्षते | = | **नापेक्षते।** |

**ह. विशेष्य-विशेषण – अन्वितिः।**

**१. गद्यांशे विशेषणं चित्वा लिखत।**

i. ________ संसारे।

**उत्तरः परिवर्तिनि** संसारे।

ii. ________ संशोधनेषु।

**उत्तरः विविधेषु** संशोधनेषु।

iii. ________ ज्ञानार्जनम्।

**उत्तरः अपरिमितं** ज्ञानार्जनम्।

२. **विशेषणस्य योग्यं रूपं लिखित्वा रिक्तस्थानं पूरयत।**

i. विविधेषु संशोधनेषु।

________संशोधनानाम्।

________संशोधनेभ्यः।

**उत्तर:** विविधेषु संशोधनेषु।

**विविधानां** संशोधनानाम्।

**विविधेभ्यः** संशोधनेभ्यः।

ii. सहायकं लघूपकरणम्।

________लघूपकरणे।

________लघूपकरणानि।

**उत्तर:** सहायकं लघूपकरणम्।

**सहायके** लघूपकरणे।

**सहायकानि** लघूपकरणानि।

iii. एकं नाणकम्।

________मुद्रा।

________दीनारः।

**उत्तर:** एकं नाणकम्।

**एका** मुद्रा।

**एकः** दीनारः।

## अवबोधनम्।

**अ. एकवाक्येन उत्तरत।**

*१. **कः** ज्ञानकल्पवृक्षः?

**उत्तरः अन्तर्जालं नाम** ज्ञानकल्पवृक्षः ।

*२. अन्तर्जालम् अस्मभ्यं **किं** वितरति?

**उत्तरः** अन्तर्जालम् अस्मभ्यं **सर्वविधं संज्ञापनं** वितरति।

*३. आर्थिकमन्दायने **किं** वरदानम् अस्ति?

**उत्तरः** आर्थिकमन्दायने **सङ्गणकीयवाणिज्यं** वरदानम् अस्ति।

४. सङ्गणकस्य अन्तर्जालस्य वा साहाय्येन सर्वे जनाः विविधविषयकाणि नानाकार्याणि **कथं** कर्तुं शक्नुवन्ति?

**उत्तरः** सङ्गणकस्य अन्तर्जालस्य वा साहाय्येन सर्वे जनाः विविधविषयकाणि नानाकार्याणि **विना कर्गजं शीघ्रतया सहजतया विना प्रमादं स्वल्पमानवीयबलेन** कर्तुं शक्नुवन्ति।

५. धनस्य हस्तान्तरणार्थं **किम्** अवलम्ब्यते?

**उत्तरः** धनस्य हस्तान्तरणार्थं **सद्यस्क-कुसीदवृत्तिः (Online Banking)** अवलम्ब्यते ।

६. अन्तर्जालमिति **कीदृशः** वरः?

**उत्तरः** अन्तर्जालमिति **ज्ञानवृद्धिकरः** वरः ।

७. **केन** निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यते?

**उत्तरः अन्तर्जालेन** निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यते।

८. सङ्गणकयन्त्रस्य **कः** कार्यक्रमः अन्तर्जाले उपलब्धो भवति?

**उत्तरः** सङ्गणकयन्त्रस्य **सॉफ्टवेअर** कार्यक्रमः अन्तर्जाले उपलब्धो भवति।

९. जना: सङ्गणकीयपत्रेण सत्वरं **किं** प्रेषयन्ति?

**उत्तर:** जना: सङ्गणकीयपत्रेण सत्वरं **स्वसन्देशम्** प्रेषयन्ति।

१०. अन्तर्जालस्य उपयोग: **किमर्थं** भवतु?

**उत्तर:** अन्तर्जालस्य उपयोग: **मानवहिताय** भवतु।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. एष: आधुनिक: कल्पवृक्ष: _______ सर्वविधं ज्ञानं वितरति।

(अस्मान् / अस्मभ्यं / अस्माकं)

**उत्तर:** एष: आधुनिक: कल्पवृक्ष: **अस्मभ्यं** सर्वविधं ज्ञानं वितरति।

**स्पष्टीकरण – 'वि + तृ → तर्'** (१ परस्मैपदम्) या धातूला चतुर्थीची अपेक्षा असते.

*२. धनस्य हस्तान्तरमनेन तन्त्रज्ञानेन कर्तुं शक्नुम: _______ ।

(अहं / आवां / वयं)

**उत्तर:** धनस्य हस्तान्तरमनेन तन्त्रज्ञानेन कर्तुं शक्नुम: **वयम्** ।

३. निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यते _______ ।

(अनेन / अस्य / अयम्)

**उत्तर:** निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यते **अनेन**।

४. तस्य साहाय्येन नानाकार्याणि विना _______ कर्तुं शक्नुवन्ति जना:।

(प्रमादस्य / प्रमाद: / प्रमादम्)

**उत्तर:** तस्य साहाय्येन नानाकार्याणि विना **प्रमादं** कर्तुं शक्नुवन्ति जना:।

५. अन्तर्जालस्योपयोग: केवलं _______ एव भवतु।

(मानवहितस्य / मानवहिताय / मानवहितेन)

**उत्तर:** अन्तर्जालस्योपयोग: केवलं **मानवहिताय** एव भवतु।

**क. सत्यं वा असत्यम् इति लिखत।**

१. अर्वाचीनकाले अन्तर्जालमेव अल्पवृक्षः।

**उत्तर: असत्यम्।**

२. चिरेणैव ज्ञानलालसा सम्पूर्यते अनेन।

**उत्तर: असत्यम्।**

३. सांख्यिकीयं ज्ञानं अन्तर्जाले उपलब्धं भवति।

**उत्तर: सत्यम्।**

४. जनाः सङ्गणकीयपत्रेण सत्वरं स्वसन्देशं प्रेषयन्ति।

**उत्तर: सत्यम्।**

**ङ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. अर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः। यतः _______

(एतस्मिन् नैकानि पुष्पाणि विकसन्ति। /
अनेन ज्ञानलालसा सपदि सम्पूर्यते।)

**उत्तर:** अर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः। यतः **अनेन ज्ञानलालसा सपदि सम्पूर्यते।**

२. अन्तर्जालतन्त्रज्ञानेन धनस्य हस्तान्तरणं कर्तुं शक्नुमः। यतः _______

(एतदर्थं सद्यस्क-कुसीदवृत्तिः अवलम्ब्यते। /
एतदर्थम् अस्माकं समीपे विपुलं धनं वर्तते।)

**उत्तर:** अन्तर्जालतन्त्रज्ञानेन धनस्य हस्तान्तरणं कर्तुं शक्नुमः। यतः **एतदर्थं सद्यस्क-कुसीदवृत्तिः अवलम्ब्यते।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'अर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः ' एतद् विषये स्वमतं माध्यमभाषया स्पष्टीकुरुत।

उत्तर: 'ज्ञानकल्पवृक्षः।' हा पाठ आपल्याला इंटरनेटविषयी माहिती देतो व त्याचे महत्त्व सांगतो. हा माहितीपूर्ण पाठ इंटरनेटचे अनेकविध उपयोग सांगून त्याचे फायदे कथन करतो. या पाठात इंटरनेटचे सर्व मनोकामना पूर्ण करणाऱ्या कल्पवृक्षाशी तुलना केली असून याला 'ज्ञानकल्पवृक्ष' असे संबोधले आहे.


पुरातन काळात कल्पवृक्ष हा एक असा काल्पनिक वृक्ष होता ज्याच्याखाली बसल्यावर मनुष्याच्या इच्छा तो वृक्ष पूर्ण करतो; असा लोकांचा समज होता. सध्या 'इंटरनेट' हा आधुनिक कल्पवृक्ष आहे जो एक बटन दाबल्यावर आपल्याला हवी ती माहिती पुरवितो. विविध शास्त्रे, विद्यांचे ज्ञान, वेगवेगळ्या संस्थांची माहिती, हजारो पुस्तके, पर्यटनासाठी उपयुक्त माहिती, बैठकांचे आरक्षण, खूप दूरवर असणाऱ्या लोकांचे दर्शन व त्यांच्याशी संवाद साधणे तसेच सर्व प्रकारचे सामान्यज्ञान इंटरनेटवर सहजपणे उपलब्ध होते. संख्याशास्त्रीय माहिती व संगणकप्रणालीही इंटरनेटवर सहज उपलब्ध असते.

ऑनलाईन बँकिंग, शुल्कभरणा तसेच संगणकीय वाणिज्यही यावर शक्य आहे तसेच संगणकीय पत्राद्वारे (ई-मेलद्वारे) संदेशही त्वरित पाठविले जाऊ शकतात. अशाप्रकारे इंटरनेटच्या साहाय्याने अतिशय अवघड कार्य आपण चटकन व सुलभरित्या करू शकतो. वेगवेगळ्या विषयासंबंधी असलेले कार्य बिनचूक व अल्प-मानवी प्रयत्नांनी शक्य होते.

इंटरनेटद्वारा आपण हवे ते ज्ञान क्षणार्धात प्राप्त करू शकतो यासाठीच त्याची पुरातन काळातील कल्पवृक्षाशी तुलना केली असून त्यास आधुनिक काळातील 'ज्ञानकल्पवृक्ष' म्हटले आहे.


## पृथक्करणम्।

१. अन्तर्जालतन्त्रज्ञानेन किं किं समुपलभ्यते तद् गद्यांशे चित्वा जालरेखाचित्रं पूरयत।




उत्तरः
१. ज्ञानम् २. वैश्विकवार्ताः
३. संज्ञापनम् ४. ग्रन्थाः
५. पर्यटनार्थम् ६. आसनारक्षणम्
७. दर्शनम् ८. सम्भाषणम्
९. सामान्यज्ञानम्

२. अन्तर्जालतन्त्रज्ञानेन वयं किं कर्तुं शक्नुमः तद् गद्यांशे पठित्वा जालरेखाचित्रं पूरयत।




उत्तरः
१. सङ्गणकीयवाणिज्यम्
२. हस्तान्तिरणम्

३. कुसीदवृत्तिः

४. सङ्गणकीयपत्रेण

५. सद्यस्क

## शब्दज्ञानम्।

**अ. गद्यांशे समानर्थकपदं चिनुत।**

| | | |
|---|---|---|
| १. | पुरातनकाले, पूर्वतनकाले | = **प्राचीनकाले।** |
| २. | आधुनिककाले, सद्यःकाले, नूतनकाले, नवकाले | = **अर्वाचीनकाले।** |
| ३. | क्षणमात्र, मुहूर्तमात्रेण | = **निमिषमात्रेण।** |
| ४. | संसूचनम्, संज्ञाप्तिः, सम्बोधः | = **संज्ञापनम्।** |
| ५. | संवादः, आलापः | = **सम्भाषणम्।** |
| ६. | दोषः, अपराधः, विप्रतिपत्तिः | = **प्रमादः।** |
| ७. | वरः | = **वरदानम्।** |
| ८. | अर्थम्, वित्तम्, द्रव्यम् | = **धनम्।** |

**ब. गद्यांशे विपरितार्थकपदं चिनुत।**

| | | |
|---|---|---|
| १. | प्राचीनकाले | × **अर्वाचीनकाले।** |
| २. | अनुपलब्धः | × **उपलब्धः।** |
| ३. | शनैः शनैः, मन्दं मन्दम् | × **शीघ्रतया, सत्वरम्।** |
| ४. | शापः | × **वरः, वरदानम्।** |

**क. भिन्नार्थकशब्दानां ज्ञानम्।**

'वरः' नाम वरदानं पतिः च।

i. ज्ञानवृद्धिकरः वरः खलु एषः।
अस्मिन् वाक्ये वरः नाम ___१___ ।

ii. सीतायाः वरः राघवः।
अस्मिन् वाक्ये वरः नाम ___२___ ।

**उत्तर: १. वरदानम्। २. पतिः।**

**ङ. समूहेतरपदं चिनुत।**

१. ग्रन्थाः, वैश्विकवार्ताः, वरदानम्, आसनारक्षणम्

**उत्तर: वरदानम्।**

२. महाजालम्, सॉफ्टवेअर, सामान्यज्ञानम्, संज्ञापनम्

**उत्तर: महाजालम्।**

३. सद्यस्क-आलापम्, दूरसञ्चारतन्तुः, सङ्गणकीयपत्रम्, सद्यस्क-कुसीदवृत्तिः

**उत्तर: दूरसञ्चारतन्तुः।**

४. शक्नुमः, कुर्वन्ति, वितरति, भवतु

**उत्तर: भवतु।**

५. कुर्वन्ति, सम्पूर्यते, प्रेषयन्ति, शक्नुवन्ति

**उत्तर: सम्पूर्यते।**

६. ज्ञानवृद्धिकरः, सङ्गणकीयपत्रम्, सद्यस्क-कुसीदवृत्तिः, सङ्गणकीयवाणिज्यम्

उत्तरः **ज्ञानवृद्धिकरः।**

## इ. चतुर्थपदं लिखत।

१. कल्पवृक्षः : प्राचीनकाले :: ज्ञानकल्पवृक्षः : _______

उत्तरः कल्पवृक्षः : प्राचीनकाले :: ज्ञानकल्पवृक्षः : **अर्वाचीनकाले**

२. सम् + पूर् : सम्पूर्यते :: सम् + उप + लभ् : _______

उत्तरः सम् + पूर् : सम्पूर्यते :: सम् + उप + लभ् : **समुपलभ्यते**

३. शक् : शक्नुवन्ति : : कृ : _______

उत्तरः शक् : शक्नुवन्ति : : कृ : **कुर्वन्ति**

४. सन्देशप्रेषणम् : सङ्गणकीयपत्रम् :: सम्भाषणम् : _______

उत्तरः सन्देशप्रेषणम् : सङ्गणकीयपत्रम् :: सम्भाषणम् : **सद्यस्क-आलापम्**

५. सम्पूर्यते + अनेन : सम्पूर्यतेऽनेन :: समुपलभ्यते + अनेन : _______

उत्तरः सम्पूर्यते + अनेन : सम्पूर्यतेऽनेन :: समुपलभ्यते + अनेन : **समुपलभ्यतेऽनेन**

फ. धातुसाधित-अव्ययानां चयनम्।

१. गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

उत्तरः कर्तुम्।

ग. सन्धिविग्रहं कुरुत।

*१. शक्नुमो वयम् = शक्नुमः+ वयम्।

*२. तैश्च = तैः + च।

३. निमिषमात्रेणैव = निमिषमात्रेण + एव।

४. सम्पूर्यतेऽनेन = सम्पूर्यते + अनेन।

५. कार्यक्रमोऽपि = कार्यक्रमः + अपि।

६. अन्तर्जालस्योपयोगः = अन्तर्जालस्य + उपयोगः।

ह. सन्धिं कुरुत।

*१. वरदानम् + एव + इति = वरदानमेवेति।

२. इति + उक्त्वा = इत्युक्त्वा।

३. समुपलभ्यते + अनेन = समुपलभ्यतेऽनेन।

४. आलापम् + अपि = आलापमपि।

५. मानवहिताय + एव = मानवहितायैव।

**ई. विशेष्य-विशेषण – अन्विति:।**

**१. विशेष्य-विशेषणयुगुलानि मेलयत।**

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | आधुनिक: | अ. | संज्ञापनम् |
| ii. | सर्वविधम् | ब. | वर: |
| iii. | सहस्रश: | क. | कल्पवृक्ष: |
| iv. | ज्ञानवृद्धिकर: | ड. | ग्रन्था: |

**उत्तर: i. आधुनिक: कल्पवृक्ष:।**

**ii. सर्वविधं संज्ञापनम् ।**

**iii. सहस्रश: ग्रन्था:।**

**iv. ज्ञानवृद्धिकर: वर:।**

**२. रिक्तस्थानपूर्तिं कुरुत।**

i. आधुनिक: कल्पवृक्ष:।

________ कल्पवृक्षौ।

________ कल्पवृक्षा:।

**उत्तर:** आधुनिक: कल्पवृक्ष:।

**आधुनिकौ** कल्पवृक्षौ।

**आधुनिका:** कल्पवृक्षा:।

ii. सर्वविधं संज्ञापनम्।

________ क्रीडा।

________ प्रयत्न:।

**उत्तर:** सर्वविधं संज्ञापनम्।

**सर्वविधा** क्रीडा।

**सर्वविध:** प्रयत्न:।

iii. ज्ञानवृद्धिकर: वर:।

________ आशीर्वचनम्।

**उत्तर:** ज्ञानवृद्धिकर: वर:।

**ज्ञानवृद्धिकरम्** आशीर्वचनम्।

## सूचनानुसारं परिवर्तनं कुरुत।

*१. महाक्रान्तिः एषा। ('क्रान्तिः' इति पदस्य स्थाने 'परिवर्तनम्' प्रयुज्य लिखत।)

उत्तर: **महापरिवर्तनम् एतद्।**

**स्पष्टीकरण** – महती क्रान्तिः = महाक्रान्तिः

∴ महत् परिवर्तनम् = महापरिवर्तनम्

क्रान्ति स्त्रीलिंगी असून 'परिवर्तनम्' नंपुंसकलिंगी आहे.

'परिवर्तनम्' ला लावलेले सर्वनाम नपुंसकलिंगी होईल.

स्त्रीलिङ्गम् , प्रथमा एकवचनम् — 'एतद्' स्त्रीलिङ्गम् , प्रथमा एकवचनम्

महाक्रान्तिः — एषा।

↓ ↓

महापरिवर्तनम् — एतद्।

नपुंसकलिङ्गम् , प्रथमा एकवचनम् — 'एतद्' नपुंसकलिङ्गम् , प्रथमा एकवचनम्

*२. जनाः सङ्गणकीयपत्रेण स्वसन्देशं प्रेषयन्ति। (प्रयोगपरिवर्तनं कुरुत।)

उत्तर: **जनैः सङ्गणकीयपत्रेण स्वसन्देशः प्रेष्यते।**

**स्पष्टीकरण** – कर्ता — कर्म — सकर्मक-कर्तरि-क्रियापदम् = सकर्मक –कर्तरि-प्रयोगः

१ — २ — १

जनाः सङ्गणकीयपत्रेण स्वसन्देशं प्रेषयन्ति।

↓ ↓ ↓

जनैः सङ्गणकीयपत्रेण स्वसन्देशः प्रेष्यते।

३ — १ — १

कर्ता — कर्म — कर्मणि-क्रियापदम् = कर्मणि-प्रयोगः

*३. अधुना सङ्गणकोऽन्तर्जालं वा <u>गृहे गृहे</u> विद्यतेऽस्माकम्। (अधोरेखितपदस्य स्थाने समस्तपदं प्रयुज्य पुनर्लिखत।)

उत्तर: अधुना सङ्गणकोऽन्तर्जालं वा **<u>प्रतिगृहं</u>** विद्यतेऽस्माकम्।

**स्पष्टीकरण – प्रतिगृहम् = गृहे गृहे। अव्ययीभाव समासः**

*४. अनेन तन्त्रज्ञानेन वयं विविधव्यवहारार्थं धनस्य हस्तान्तरणं कर्तुं शक्नुमः। ('वयम्' इति पदस्य स्थाने 'जनाः' पदं प्रयोजयत।)

उत्तर: अनेन तन्त्रज्ञानेन **जनाः** विविधव्यवहारार्थं धनस्य हस्तान्तरणं कर्तुं **शक्नुवन्ति**।

**स्पष्टीकरण** – कर्ता — क्रियापदम् = 'शक्'५ परस्मैपदम् , वर्तमानकालः

प्रथमपुरुषः बहुवचनम् — प्रथमपुरुषः बहुवचनम्

वयम् — शक्नुमः

↓ ↓

जनाः — शक्नुवन्ति

कर्ता — क्रियापदम् = 'शक्'५ परस्मैपदम् , वर्तमानकालः

तृतीयपुरुषः बहुवचनम् — तृतीयपुरुषः बहुवचनम्

५. निमिषमात्रेणैव ज्ञानलालसा सम्पूर्यते अनेन। (प्रयोगपरिवर्तनं कुरुत।)

उत्तर: **निमिषमात्रेणैव ज्ञानलालसां सम्पूरयति अयम्।**

| **स्पष्टीकरण –** | कर्म | कर्मणि-क्रियापदम् | कर्ता | = कर्मणि-प्रयोग: |
|---|---|---|---|---|
| | १ | १ | ३ | |
| निमिषमात्रेणैव | ज्ञानलालसा | सम्पूर्यते | अनेन। | |
| निमिषमात्रेणैव | ज्ञानलालसां | सम्पूरयति | अयम्। | |
| | २ | १ | १ | |
| | कर्म | सकर्मक-कर्तरि | कर्ता | = सकर्मक-कर्तरि-प्रयोग: |

६. ज्ञानवृद्धिकर: वर: खलु एष:। ('वर:' इति पदस्य स्थाने 'वरदानम्' इति पदस्य प्रयोगं कुरुत।)

उत्तर: **ज्ञानवृद्धिकरं वरदानं खलु एतद्।**

**स्पष्टीकरण –**

| | | | |
|---|---|---|---|
| विशेषणम् (पुंलिङ्गम् प्रथमा एकवचनम्) | कर्ता (पुंलिङ्गम् प्रथमा एकवचनम्) | | सर्वनाम 'एतद्' (पुंलिङ्गम् प्रथमा एकवचनम्) |
| ज्ञानवृद्धिकर: | वर: | खलु | एष:। |
| ज्ञानवृद्धिकरं | वरदानं | खलु | एतद्। |
| विशेषणम् (नपुंसकलिङ्गम् प्रथमा एकवचनम्) | कर्ता (नपुंसकलिङ्गम् प्रथमा एकवचनम्) | | सर्वनाम 'एतद्' (नपुंसकलिङ्गम् प्रथमा एकवचनम्) |

**'वर:'** हा कर्ता पुंलिंगी प्रथमा एकवचनी **'वरदानम्'** मध्ये बदलताना नपुंसकलिंगी प्रथमा एकवचनी होतो. म्हणून त्याचे विशेषण व सर्वनामही नपुंसकलिंगी प्रथमा एकवचनात बदलावे.